तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

मे - २०२५ रू.२०/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 02
May 2025, Price Rs.20/-
No. of pages-24



कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमाम्यहम्
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितम् जगदिदं, कृष्णस्य दासोऽस्म्यहम्
कृष्णे तिष्ठति सर्वमेतदखिलं, हे कृष्ण रक्षस्व माम्।।

# कल्याणं कमनीयम्

15-03-2025 तिथौ
आन्ध्रप्रदेशस्थामरावतीनगरे
वेङ्कटपाले प्रान्ते ति.ति.
देवस्थानद्वारा
श्रीवेङ्कटेश्वरस्वामिनः
कल्याणोत्सवः अत्यन्त
वैभवोपेततया प्रवर्तितः।



आन्ध्रप्रदेशस्थामरावतीवेङ्कटपालें प्रान्ते श्रीवेङ्कटेश्वरस्वामिनः आन्ध्रप्रदेशराज्यपालकः श्री यस् अब्दुलनजीरु महाशयाः, धर्मपत्न्या सहितः आन्ध्रप्रदेशमुख्यमन्त्री माननीय श्री यन्.चन्द्रबाबुनायुडु महोदयाश्च दर्शन भाग्यं प्राप्तवन्तौ। अस्मिन् सन्दर्भे माननीयमुख्यमन्त्रि महोदयेभ्यः भगवतः तीर्थप्रसादं चित्रपटश्च ति.ति.देवस्थान धर्मकर्तुमण्डल्यध्यक्ष श्री बि.आर्.नायुडुमहोदयः ति.ति.देवस्थानकार्यनिर्वहणाधिकारि श्री जे.श्यामला रावु ऐ.ए.यस्., महोदयश्च अनुबन्धकार्यनिर्वहणाधिकारि, श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयश्च दत्तवन्तौ। श्रीवेङ्कटेश्वरस्वामिनः कल्याणोत्सव सन्दर्भे सायंसमये आन्ध्रप्रदेश मुख्यमन्त्रि माननीय श्री चन्द्रबाबुनायुडु महोदयाः भगवतः पवित्र पीताम्बरं समर्पितवन्तः। अस्मिन्कार्यक्रमे आन्ध्रप्रदेशदेवादायशाखामात्याः, श्री श्री श्री पेद्दजीय्यरस्वामी, श्री श्री श्रीचिन्नजिय्यर् स्वामी, धर्मकर्तुमण्डलीसदस्य गणः अन्ये च ति.ति.देवस्थानोन्नताधिकारिणश्च भागं गृहीतवन्तः।












# गीतामृतम्

श्रीभगवानुवाच -

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः फलं गछन्त्यनामयम्।।
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासिनिर्वेदं श्रोतव्यस्य श्रुतस्य च।।

(भगवद्गीता २.५१-५२)

हे अर्जुन! शुद्धसमत्वबुद्धिमन्तः, निष्कामकर्मानुष्ठानुपराः कर्मणः जायमानफलं परित्यज्य पुनर्जन्मनामकबन्धात् विनिर्मुक्ताः सर्वोपद्रवरहित ब्रह्मपदं प्राप्नुवन्ति।

यदा तव मनः अज्ञाननामककल्मषं पूर्णतया तरिष्यति तदा श्रोतव्यर्थात् श्रुतार्थात् कर्मविषये विरक्तिं प्राप्स्यसि।

विशेषांशः साधकस्य मनः यावत्कालपर्यन्तं प्राकृतविषयमालिन्यं न तरति, अर्थात् प्रकृतेः परं पदं न प्राप्नोति तावत्पर्यन्तं सः बद्धः एव। यदा विषयवासनानाशात् निर्विषय स्थितिः प्रभवति तदैव इतः पूर्वं गुरुशास्त्र श्रवणात् अर्थः अवगतो भवेत्। तदा एतदूज्ञानस्थितेः अन्यं श्रोतव्यं नास्तीति बोधः स्यात्। अर्थात् प्रकृतिरहितानन्तरमेव तत्त्व बोधः स्यात्।



# सङ्कीर्तनम्

रामदशरथराम निजसत्य
काम! नमो नमो काकुत्स्थराम
कल्याणनिधिराम कौसल्यानन्दनराम
परमपुरुष सीतापति राम
शरधिबन्धनराम सवनरक्षकराम
गुरुतर विवंशकोदण्डराम
दनुजहरण राम दशरथसुतराम
विनुतामरस्तोत्रराम महनीयगुणराम
अनिलजप्रियराम अयोध्याराम
सुललित यशोराम सुग्रीववरदराम
कलितप्रताप श्रीवेङ्कटगिरिराम।



(अन्नमाचार्य आध्यात्मक सङ्कीर्तना)

# माधवप्रियमासः मधुमासः

चराचरप्रपञ्चे 'जातस्य ध्रुवं मृत्युः'' इति गीता वचनमनिवार्यमेव। जननमरणानि सौरचलनसम्बद्धानि। अत एव सूर्यः कालः इत्युभिधीयते। शकटचक्रवत् भ्रमणे कालचक्रे ऋतुमासधर्मेषु प्रवर्तमानेषु मार्ग शीर्षमासानन्तरं तादृशप्राधान्यविशिष्टः मासः वैशाखमासः। अस्यैव माधवप्रियमासः इति वक्तुं शक्यते। महाविष्णोः प्रीतिप्रदः मानवजातेः महत्तरसन्देशप्रदायकमहोज्वलमासोऽयम् अर्चावतारेण सह प्रतिपत्तिप्रतिपादकमहोन्नतानां जन्मतिथयः अस्मिन् मासे एव प्रवर्तन्ते। आदौ सर्वप्रपत्तिस्वरूपप्रह्लादं रक्षित्वा अहङ्कारिणः हिरण्यकशिपोः संहर्तुः नृसिंहस्वामिनः जयन्ती अस्मिन् मासे एव। भगवतः सर्वान्तर्यामित्वं सर्वगतत्त्वं विज्ञाय आत्मसमर्पणं कृतवतः प्रह्लादस्य रक्षणम् अहंकृतस्य हिरण्यकशिपोः मरण दण्डनं, दुष्टशिक्षणशिष्टरक्षण कार्यान्तरगते एव। स्वावतारात् शरणागतितत्त्वस्य आचार्यस्थानमूर्तिमत्वस्यकर्ता महनीयः आञ्जनेयस्वामी। सर्वविधसामर्थ्ये सत्यपि त्रिकरणशुद्ध्या दासभावं स्वीकृत्य श्रीरामस्य कार्याणि अतिसमर्थतया साधकः, निस्स्वार्थजीविनः हनुमतः जयन्ती अपि अस्मिन्मासे प्रवर्तते। अण्वणौ अन्तर्यामिनं दृष्ट्वा शिवोऽहमिति अद्वैतभावनां प्रकट्य जनोपदेशकर्ता आदिशङ्करः। अयं पारमार्थिकपरमावधिं प्राप्य आत्मोद्धरणार्थं भजगोविन्दम्, शिवानन्दलहरी, सौन्दर्यलहरी, कनकधारास्तवम्, लक्ष्मीनृसिंह करावलम्बस्तोत्रं जनेभ्यः दत्वा चरितार्थः बभूव। भिन्नपात्रेषु एकैकचैतन्यस्वरूपं स्वरचनासु प्रकट्य नूतनसन्देशं ददौ। अयं लोकोपकारी प्रस्थानत्रयस्य भाष्यं व्यरचीत्। आत्मानात्मविवेकं मानवगम्यां आध्यात्मिकविद्यां दत्वा सर्वेभ्यः कर्तव्यप्रबोधकः धर्मोद्धारकः बभूव। भगवद्रामानुजस्य विशिष्टाद्वैतसिद्धान्तः अनन्यशरणागतितत्त्वप्रधानः। नम्माल्वारु रचनाः भगवद्गानलहर्यः परमात्मनः सर्वशेषित्वप्रधानाः। पदकवितापितामहस्य अन्नमाचार्यस्य पदकविता, पतिपत्नी-जीवात्मपरमात्मसंलीनताभावद्योतकदिव्यशरणागतिदीपिका। वर्गवर्णवैषम्यातीततया सर्वजीवसमताभावेन भगवति दीर्घशरणा गतिः तस्य गीतिकासारः प्राचीन धार्मिकज्ञानसारं सङ्कीर्तनभिः समर्पितमहाघनः अयम्। अद्वैतभावनाप्रतिरूपे शङ्करे सति सर्वदेवसमैक्यं वेङ्कटेश्वरे प्रदर्श्य भिन्वत्वे एकत्वं दर्शयामास। एवं महापुरुषैः स्वावतरणे आदृतमासोऽयं मधुमाधवप्रियमासः। अस्मिन् मासे एव गृहप्रवेशार्थं, देवताप्रतिष्ठार्थं आलयादिक्रतुनिर्वहणार्थं शुभमुहूर्तानि लभ्यन्ते। अस्मिन्मासे प्रत्यहं एकवारं वा श्रीमन्नारायणस्मरणकार्यमवश्यं कर्तव्यम्। मासाचरणविधयः सर्वे आरोग्यप्रदाः एव। अस्मिन्मासे ति.ति.देवस्थानेन निर्वाह्यमान पर्वदिनोत्सवाश्च बहवः सन्ति। तिरुचानूरु श्रीपद्मावती देवी वसन्तोत्सवाः, हृषीकेश, नारायणवनम् जम्मलमडुगु कार्वेटिनगरक्षेत्रेषु ब्रह्मोत्सवाः, तरिगोण्डवेङ्गमाम्बा जयन्ती इत्यादीनि ति.ति.देवस्थानं महावैभोवोपेत तया निर्वहति। सर्वेभक्ताः उत्सवेषु भागस्वामिनः भूत्वा स्वामिकृपायाः पात्राः भवन्तु।

# मे -२०२५

सम्पुटिः-१२ सञ्चिका-०२

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर वैशाखशुद्धचतुर्थीगुरुवारदारभ्य - ज्येष्ठशुद्धपञ्चमी शनिवारपर्यन्तम् - २०२५


| | |
|---|---|
| कूर्मजयन्ती | 06 |
| - डा वि.माधवरेड्डि | |
| नृसिंहजयन्ती | 08 |
| - डा पि.माधवी | |
| समुद्रमन्थनम् | 10 |
| - श्रीमति विजय भट्ट | |
| हनुमत्पूजाविधानम् | 11 |
| श्रीशेषाद्रीशस्तुतिः | 15 |
| - श्री कन्दाल लक्ष्मीनारायणः | |
| रामानुज जयन्ती | 17 |
| - आचार्य जि.पद्मनाभम् | |
| पतिव्रताशक्तेः पुरतः महती तपश्शक्तिरपि निष्फलैव | 19 |
| - डा एम्.ईश्वरम्म | |
| परदुर्बोधः प्रविनाशायैव (चित्रकथा) | 20 |
| - डा.के.सूर्यनारायणरेड्डि | |
| बालविनोदिनी | 22 |


मुखचित्रम् - उभयदेवीभ्यां श्रीवेणुगोपालस्वामिनः, कार्वेटिनगरम्

अन्तिमपुटः- श्रीनृसिंहस्वामिणः चित्रम् (चित्रकारः - श्रीमणियं सेल्वन्)


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९

सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते सम्पर्कं कुर्वन्तु -

sapthagiri.helpdesk@tirumala.org



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-


*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -
प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -
श्री पि.रामराजु, M.A.,
प्रत्येकाधिकारी, ति.ति.दे.मुद्रणालयः, तिरुपतिः।

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.






सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
– प्रधानसम्पादकः

# कूर्मजयन्ती

- डा.वि.माधवरेड्डि
चरवाणी - ८५१९८०४७८४



महाविष्णोः दशावतारेषु कूर्मावतारः द्वितीयःकल्किशेव च। मत्स्यःकूर्मवराहश्च नारसिंहश्च वामनः। रामो शमश्च कृष्णश्च बुद्धः- कूर्मे कमठ कच्छपौ इति नाम सूचयति कुत्सितः ऊर्मिवर्गः अस्य कूर्मः। जलं ऊर्वतीति वा कूर्मः इति विवरणम्। अवतारेषु मत्स्यकूर्म वराहनारसिंह वामनावतारणां एकैक प्रयोजनं लक्ष्यम्। आद्यवतारत्रयं जन्त्ववतार सम्बन्धि। पञ्चावतारेषु कूर्मावतारः भिन्नः। मत्स्यावतारे हिरण्यविदलनं वराहावतारे हिरण्यकुक्षिविदलने भूम्युद्धरणं विशेषः वैशाख पूर्णिमायां सायङ्काले कूर्मावतार जयन्ति निर्वहणीयः। अस्मिन् वर्षे मे मासे १२ तिथौ कूर्मजयन्ती इति ति.ति.दे. कालनिर्णय पट्टिकायां निर्दिष्टम्। कूर्मावतारे राक्षससंहारो नस्ति। देवतानाममृत समर्पणप्रयत्नः अत्र द्योत्यते। केवलमत्र विष्णोः कूर्मरूपावतारः मोहिन्यवतारोऽप्यन्यः। आत्मने गृहिणी सम्पादनप्रयत्नोप्यस्ति। अमृतानयनोपायः विष्णुप्रोक्तः एव। एककार्यनिमित्तं देवदानवहस्तौ मिलितौ। वासुकिना रज्जु रूपेण परिणते सति समुद्रमथनाय शिरोभागस्वीकरणे विष्णुहस्तः वर्तते। मन्थने मन्दरपर्वतस्य आधारभावात् अधिकभारात् पर्वतः समुद्रे पतितः। तदा देवगणसाहाय्यार्थं विष्णुः महाकूर्मः सञ्जातः। लक्षयोजन विस्तृत्याकारकठिन शरीरोपरिभागत्वक्। अवसरे प्राप्ते ब्रह्माण्डमपि खादनसमर्थमहावदनम् सकलजीवराशीनपि स्वोदरे निक्षेप्तुं समर्थम्। प्रपञ्चे, अन्यप्रपञ्चे पतितेऽपि बोढुं समशौपादौ। अन्तर्बहिः मनः महद्वदनम्। पद्मकान्तिनयने। एवं समयानुकूलतया विष्णुः कूर्मरूपं समर्थमिति सम्भाव्य तद्रूपं संप्राप्य समुद्रे प्रविवेश। अधः पतितं मदरपर्वतं महा सर्पं वासुकिमपि एकवारमेव उत्थापयामास। तस्मिन् समये आश्चर्यचकिताः देवदानवाः कमलाक्षं शरणं प्रापुः. समुद्रमथनकारिषु श्रीहरिरुप्येकः सञ्जातः। समुद्रतक्रकुम्भाय स्वयमेव मन्थनदण्डः, रज्जुश्च सञ्जातः। देवदानवाः गोपालकाश्च मन्थनकार्यमग्नाः आसन्। तस्मिन् समये स्वेदशरीराः विषाग्निना तप्तहस्ताः अपि परस्पर असूयाकारणात् दृढप्रयत्नाः मन्थनाज्ञ द्विरक्ताः। समुद्रजलजन्तवः तस्मिन् समये ध्वस्तशरीराः कल्लोलमनस्काः आसन्। दानवाः मध्ये मध्ये कियत्पर्यन्तं मन्थनमिति पृच्छन्तिस्म मन्दरपर्वतमन्थन शब्दः यावद्ब्रह्माण्डं व्याप्तः। मन्दरपर्वतस्य इतस्ततः भ्रमणात् कूर्मोऽपि बाधापीडितः आसीत्। तदैव हालाहलमुद्भूतम्। तत् हालाहलं प्रलयकालरुद्रादपि भयङ्करं बभूव। कल्पान्तजायमान अग्नेरपि सहस्राधिकतया जज्वाल। प्रलयकालसूर्याधिकतया द्रष्टुमशक्यः सर्वत्र व्याप्तः। तदा ब्रह्मा शिवं शरणं गत्वा रक्षणार्थं प्रार्थयामास। शिवः परहितं परमार्थाम् सम्भाव्य हालाहलं स्वादुफलरसमिव पिबेयमित्यवोचत्। पार्वत्यपि लोकहितार्थं भर्तुरनुमतिं ददौ। शिवः महागरळं अवलीलया पपौ।

तदा क्षीरसागरे ऐरावतः अप्सरसः, चन्द्रः जाताः ततः लक्ष्मीराविर्भूता। ततः। तस्याः मङ्गलस्नानं कारयामासुः। समुद्रः पीताम्बरं, वरुणः वैजयन्तीमालां विश्वकर्मा स्वर्णाभरणंविष्णुः लक्ष्मीदेवीं स्वीचकार।

विष्णोराज्ञया ब्रह्मा इन्द्राय ऐरावतं, अष्टाप्सरसः, रत्न छत्रं, ददौ। कुबेराय नवनिधीन् सूर्याय सप्ताश्वान् कौस्तुभं श्रीमन्नारायणाय पुनः, शमन्तकमणि, कुण्डले च सूर्याय ददौ। शमन्तमणि प्रभावात् क्षुद्बाहेन स्तः। अन्धकारः न स्यात्। कुण्डले अमृतलेपनत्वात् भरणमपि न स्यात्। वरुणाय पुष्पकविमानं ददौ। शिवः सूर्यप्रकाशकं,

लोकत्रयभयङ्कररावं शत्रुभयङ्करं शङ्खं ब्रह्मणः स्वीचकार। सर्वान् रथान् कुबेराय दत्वा गरुडध्वजरथं मा अधिरोह इति सद्रः केवलस्थः विष्णूपयोज्यः इत्यवोचत्। ततः कश्यपादिमहर्षिभ्यः कामधेनूः चक्रवर्तिभ्यः किरीटानि भुजकीर्ती, रत्नानि च ददौ। स्वयमेकं मणिं मायासंसारभ्रमणशक्तं ब्रह्मा दघार।

मायया अन्ते विष्णुः मोहिनीरूपं धृत्वा देवेभ्यः अमृतं राक्षसेभ्यः सुरां पानार्थं ददौ। ततः प्रभृत्येव वञ्चिताः अभवमेतिराक्षसाः देवानां नित्यवैरिणः जाताः।

**कूर्मजयन्तीपूजा -** विष्णुभक्तानां आध्यात्मिक पवित्रतां प्राप्तुं उत्तमोत्तमदिनमिदम्। कूर्मजयन्तिदिने प्रातःकाले उथाय स्नानमाचरणीयम्। गृहे वा देवालये वा विष्णुमूर्तिमलङ्कृत्य पूजासमाग्रीमानीय फलपुष्पाणि स्वादुनैवेद्यादीनि तुलसी पत्रादीनि समर्पणीयानि। उपवासनियमः सायङ्कालपर्यन्तं पालनीयः।

**कूर्मावतारमन्त्राः-** विष्णुसहस्रनामस्तोत्रपारायणं कर्तव्यम्। दीपारार्तिकं विष्णवे देया। अकिञ्चनेभ्यः अन्नवस्त्रधनादिदानानि कर्तव्यानि। वैशाखपूर्णिमायां कूर्मपूजया सर्वविधशारीरकमान सिकदैवबलं धनधान्यसपत्तिः सर्वसद्गुणप्राप्तिं कूर्मविष्णुद्वारा सर्वे भक्ताः प्राप्नुयुः।

**समुद्रमन्थनावश्यकथा -** कृतयुगे स्वर्गलोके देवसभायां सर्वे देवाः एकत्र समाविष्टाः। तदा कुबेरः सर्वान् देवान् नमस्कृत्य हे देवाः। श्रीमन्नारायणः सृष्ट्यादौ मां धनाधिपतिं नियम्य नवनिधीन् मत्स्वाधीनञ्चकार। हे शिव नवनिधयः अद्य न सन्ति। इन्द्रस्य देवाधिपत्यप्रदान समये सर्वान् रत्नराशीन् भवन्तः एव तस्मै ददुः। सर्वेभ्यः देवेभ्यः धनराशयः दत्ताः। सूर्य चन्द्रयोः अमूल्यरत्नहाराः दत्ताः। ब्रह्मा च अनन्तरन्तराशीन् स्वीचकर। महाविष्णुना, त्वया च मणिमाणिक्यानि स्वीकृतानि। एवं सर्वैरपि रत्नराशयः स्वीकृताः। अद्याहं रिक्तहस्ताऽस्मीत्यवोचत्। तदा विष्णुः त्वदुक्तं सत्यमेव।सर्वे रत्नराशयः प्रलयकाले क्षीरसागरे एव लीनाः भवन्ति। अतः वयं सर्वे क्षीरसागरमथनं करिष्यामः। तस्मात् देवदानवैः एकीभूय प्रयत्नः कर्तव्यः इत्यवोचत्। सर्वे देवाः राक्षसाः अहताः विमानद्वारा क्षीरसागरसमीपं प्रापुः विष्णुः बलिचक्रवर्तिद्वारा वासुकिमाह्वयामास। विष्णुरपि कूर्मरूपं धृत्वा वासुकिभूभारं स्वयमेव उवाह मन्दरपर्वतं स्वयमेव हस्तेनानीय क्षीरसागरजले अपातयत्। वासुकि मन्थनाय रज्जुरूपः जातः।

कदाचित् कैलासे पार्वतीपरमेश्वरै भल्लूकरूपं धृत्वा कामक्रीडामग्नावास्ताम्। तदा तयोः भल्लूकमुखेन मानव शरीरेण पुत्रः जातः। तदा कोटिसिंहबलः अजेयः कल्पान्तजीवी सर्वशास्त्रज्ञः स्वेच्छचारी निर्भयः सञ्चर इति अशीर्वादं ददौ। त्रिलोकसञ्चारिणमेनं ब्रह्मा तस्य जाम्बवान् इति नाम चकार ततः आहूय ओषधि ज्ञानं, तल्लाभ प्रदेशं ग्रन्थमेकं विलिख्य ओषधीन् ज्ञात्वा तान् भस्मीभूतान् कृत्वा क्षीरसागरे पातय इत्युक्त्वा ओषधिज्ञानग्रन्थं जाम्बवते एव ददौ, आयुर्वेदवैद्यशास्त्रमूलग्रन्थः स एव।

**कूर्मपुराणविषया : -** अष्टादश पुराणेषु सप्तदश पुराणम्। कूर्मपुराणम् दशावतारेषु विष्णोः द्वितीयावतारः कूर्मावतारः। व्यासविरचितकूर्मपुराणे १७००० श्लोकाः ९९ अध्यायाः वर्तन्ते। कूर्मरूपेण विष्णुना महर्षीनुद्दिश्य प्रोक्तमिदं पुराणम्।

**लक्ष्मी-इन्द्रद्युम्नसंवादः -** विष्णु महर्षिसंवादः सृष्टिविधानं, वर्णाश्रम धर्माः भृगुवंशवर्णनम्। युगधर्माः काशीप्रयाग क्षेत्रयोः माहात्म्यम् सदाचाराः द्वादशादित्यवर्णनमित्याद्यनेकांशाः अस्मिन् पुराणे वर्णितम्। मरीचिः, भृगुः, अङ्गिराः, पुरस्त्यः, पुलहः क्रतुः, दक्षः, अत्रिः, वशिष्ठः इति नव ब्रह्ममानसपुत्राः इति निर्दिष्टाः। आदौ सुखसन्तोषजीवने वर्तमानाः प्रजाः क्रमशः रागद्वेषभरिताः बहुदुःस्थितिं प्राप्ताः इति पुराणवचनम्। धर्मः एव आचरणीयः इति धर्मादेव अन्यपुरुषार्थसिद्धिरिति एतत्पुराणवचनम्। धर्मात्सञ्जायते ह्यर्थो धर्मात्कामोऽपि जायते। धर्म एवापवर्णीय तस्माद्धर्मं समाचरेत्। शिवकेशयोः भेदः नास्ति। भक्ताः यद्यद्रूपं आराधयन्ति भगवान् तद्रूपे ताननु- गृह्णातीति एतत्पुराणवचनं ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।

इति गीतानुगुणं वर्तते। इदं पुराणम् स्वधर्मं त्यक्त्वा तीर्थाटनं निष्प्रयोजनम्, देवालये शुचित्वं पालनीयम्, देवालयापवित्रीकरणं पापहेतुरिति पुण्यक्षेत्रप्राशस्त्यं विशदी करोति वेदविभागकर्तारः षड्विंशति वर्तन्ते। ते पराशर पुत्रः कृष्णद्वैपायनः अन्तिमः इति एतत्पुराण वचनम्। सामाजिकधर्माः गुरुधर्माः, असत्साङ्गत्यदोषाः इत्यादिविषयाः सम्यगत्र प्रपञ्चिताः। वामनावतारचरितमपि संक्षिप्य अत्र प्रोक्तम्। भक्तस्य दुर्जयस्य कथा पाठेकभ्यः चैतन्यप्रदां भवति। एत दृशोपदेशात्मकथाः बह्व्यः अत्र वर्णिताः।

एवत्कूर्मपुराणन्तु चतुर्वर्गफलप्रदम्।
पठतां श्रृण्वतां नृणां सर्वोत्कृष्टगतिप्रदम्।।



# नृसिंहजयन्ती

स्मृतिदर्पणम् गदाधरपद्धति, पुरुषार्थ चिन्तामणिः चतुर्वर्ग चिन्तामणिः इत्यादिग्रन्थेषु वैशाखचतुर्दशां नरसिंहचतुर्दशीति व्रतदिनत्वेन निर्दिष्टम्। अतः एतद्दिनमेव नृसिंहजयन्ति इति निस्सशयं वक्तुं शक्यते। विष्णुमूर्तेः दशावतारेषु नृसिंहावतारः चतुर्थः। ''मत्स्यकूर्मवराहश्च नारसिंहश्चवामनः। रामोरामश्च कृष्णश्च बुद्धः कल्किरेव च।'' इति दशावतारनिर्देशकः श्लोकः। राक्षसानां राजा हिरण्यकशिपुः स्वभार्यायाः लीलावत्याः गर्भवतीत्वसमये तपः कर्तुमटवीं जगाम। अयमेव समुचित समयः इति देवेन्द्रः राक्षससंहारं प्रारेभे। लीलावती गर्भस्थपिण्डमपि हन्तुं प्रायतत। तदा नारदः अवरूद्धय स्वाश्रमं नीत्वा रक्षन् गर्भस्थ शिशोः विष्णुभक्तिं बोधयामास। हिरण्यकशिपुः तपसा ब्रह्माणं तोषयित्वा नरैर्वा मृगैर्वा दिवा वा रात्रौ वा प्राणवद्भिर्वा अप्राणेर्वा मम मरणं माभूदिति वरं लेभे। ततः गृहं गत्वा स्वानवस्थितौ स्वभार्यारक्षकाय नारदाय कृतज्ञतां प्रकट्य ततः स्वगृहे भार्यां रक्षन् जातस्य पुत्रस्य प्रह्लादः इति नाम चकार। ततः वरगर्वात् देवताः सर्वबाधाबाधितांश्चकार। कुमारः प्रह्लादः सर्वदा विष्णुभक्तः आसीत्। पुत्रं विष्णुभक्तेः निवर्तयितुं कृताः सर्वे प्रयत्नाः विफलाः जाताः। त्वया नित्यं स्तूयमानः विष्णुः कुत्र वर्तते इति पुत्रं पिता पप्रच्छ- तदा प्रह्लादः - सर्वोपगतः भगवान् अन्विष्टेषु सर्वेषु पदार्थेषु व्याप्य वर्तते इत्यवोचत्। तदा विष्णुः अस्मिन् स्तम्भे वर्तते वा इति स्तम्भं पादेनाताडयत्। तदा विष्णुः स्तम्भं विदीर्य नृसिंहरूपे आविर्बभूव। ततः ब्रह्मणः वरस्य अविरुद्धतया अर्धनररूपं अर्धमृगरूपं धृत्वा दिवारात्र्यभावसन्ध्याकाले हिरण्यकशिपुं विदीर्य जघान।



- डा.पि.माधवी
चरवाणी - ८५१९८०४७८४

**उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं।**
**नृसिंहं भीषणं भद्रं मृत्युमृत्युंनामम्यहम्।।**

इत्येतन्मन्त्रं जपन् नृसिंहमूर्तिपूजा कृता चेत् सर्वत्र विजयो भवेत्। नृसिंहचतुर्दशीव्रतं नृसिंहपुराणं स्कान्दपुराणं सम्यक् विवृणुतः। वैशाखशुक्लचतुर्दश्यां नृसिंहजयन्ति व्रतमाचरणीयम्। अहं वैशाखशुक्ल चर्तुदश्यां रात्री जातोऽस्मि। अतः तदेव दिनं व्रताचरणाय युक्तं दिनमिति नृसिंहस्वामिना प्रोक्तम्। वैसाखशुक्लचतुर्दशीसोमवासरे स्वातिनक्षत्र प्रदोशकाले स्वामिनः जननत्वात् स्वाति नक्षत्रशनिवारसिद्धियोग वणिज नामककरणे

व्रताचरणं परमश्रेष्ठम्। परन्तु एतादृशयोगस्य आगमनं कष्टमेव। स एव योगः जन्मदिनत्वात् व्रताचरणाय सर्वेषामधिकारोऽस्तीति स्कान्दपुराणे नृसिंह वचनम्। अद्य इदं व्रतं केवलं वैष्णवैरेव आचर्यते। व्रतदिने पापहराः भूत्वा मध्याह्नस्नानमाचर्य गृहे गोमयशुद्धे प्रदेशे अष्टदलपद्मं निवेश्य कलशस्थापनं कर्तव्यम्। तस्मिन् कलशोपरि तण्डुलपूर्णकीचकं स्थापनीयम्। ततः लक्ष्मीनारायण विग्रहं संस्थाप्य शास्त्रोक्तरीत्या व्रतमाचरणीयम्। तत्काललब्धपुष्पैः पूजा कर्तव्या। निशायां जागरणं कृत्वा पुराणकालक्षेपः कर्तव्यः। अनन्तरदिने उदये पुनः पूजा आचरणीया। ततः यथा शक्ति नृसिंहप्रतिमादानं भोजनसन्तर्पणं कर्तव्यम्।

प्रह्लादपिता हिरण्यकशिपुः मूल्टानप्रान्तवासीति विश्वासेन तत्प्रान्तीयाः महता वैभवेन नृसिंहजयन्तिं निर्वहन्ति। नृसिंहनिवासचिह्नानि अद्यापि तत्र दृश्यन्ते। दक्षिणभारते नृसिंहजयन्ति पर्वदिने दीपोत्सवस्वामिविग्रहप्रचालने, वीथीभ्रमणानि कुर्वन्ति। हरप्पीस्थ नृसिंह देवालयः अतिमहान् सुविशालस्थले निर्मितः। जयपुरसंस्थाने खण्डेलाप्रदेशे द्वादशहस्त पूर्व नृसिंह विग्रहः वर्तते। मधुरायोध्यादिनगरेषु नृसिंहलीलोत्सवाः सम्यक् प्रचलन्ति। मालवदेशेऽपि नृसिंहविग्रहमलङ्कृत्य वीथीषु परिभ्रामयन्ति इति व्रतोत्सवचन्दिकाग्रन्थे प्रोक्तम् जयन्ती निर्वहणात् सर्वपापबाधा निवृत्तिः भवति। तस्मिन् दिने सायङ्कालपर्यन्तं उपवासनियमं पालयित्वा पूजानन्तरं प्रियनिवेदनं पानकं स्वमिने समर्प्य ततः स्वादुखाद्य भोजनं स्वीकुर्वन्ति।

**तप्तहाटककेशान्तज्वलात्पावकलोचन।**
**वज्राधिककरस्पशदिव्यसिह नमोऽस्तु ते।**

भागवते विदुरमुद्दिश्य मैत्रेयः जयविजययोः जन्मकारणमेव मुवाच। पुरा ब्रह्ममानसपुत्राः सनकसनन्दादयः श्रीहरिदर्शनार्थं वैकुण्ठं गत्वा द्वादशद्वारे द्वारपालक जयविजयाभ्यां अवरुद्धाः। तदा मुनीश्वराः कोपोद्रिक्ताः भूलोके मानवजन्म प्राप्नुवतां इति शप्तौ। तदा तत्सम्भाषणं श्रुत्वा श्रीहरिः लक्ष्मीसमेतः द्वारप्रदेशमागत्य सनकादिभ्यःनमस्कृत्य वृत्तं ज्ञात्वा जयविजयावुद्दिश्य एते आगताः ब्रह्ममानसपुत्राः मुनिश्रेष्ठाः। अहमेव एतेषां पादधूळिं शिरसि धरामि। तेषां युवाभ्यामवमानत्वात् मेऽपि अहितौ जातौ। तेषां शापः अवश्यमनुभोक्तव्यः। मद्भक्ताः हितकारिणः सप्तजन्मावधौ मां प्राप्तुं इच्छतः वा, जन्मत्रये मद्विरोधिनौ भूत्वा मां प्राप्तुमिच्छतः वा इति पृष्टस्तौ। जन्मत्रये एव विरोधिनौ भूत्वा तवऽहितौ त्वां प्राप्स्यावः इति एवमेव मामुनुगृह्णीष्व इति प्रार्थयामासतुः। विष्णुमूर्तिः तथास्तु इति शापप्रभावं न्यूनीचकार। एतच्छापफलतया जयविजयौ राक्षसजन्मप्राप्तौ।

कदाचित् कश्यपब्रह्मणि अग्निहोत्रगृहेसति भार्यादितिः सन्तानार्थ समयासमयौ अज्ञात्वा सन्ध्यासमये भर्तारं बलात्कृत्य कामपरवशा एकान्तप्रदेशे शरीर साङ्गत्यं चकार। ततः काश्यपः राक्षसप्रीतिकरे सन्ध्यासमये समागमात् तव राक्षसपुत्रौ क्रूरौ जगदेकवीरे जातौ श्रीहरिणा हतौ स्युरित्यवोचत्। पश्चात्तप्तया तया तव द्वितीयपुत्रस्य परमवैष्णवः कुलोद्धारकः जनिष्यतीत्यवोचत्।। पश्चात् दितिः शतवर्षपर्यन्तं गर्भधारिणी सती हिरण्याक्षहिरिण्यकशिपोः जन्म प्रदात्री बभूव। हिरण्याक्षं ब्रह्मवरात् सर्वदेवपीडाकरं, वराहरूपं धृत्वा जघानहिरिण्यकशिपुं एवं सर्वदेवबाधाकारं स्वपुत्रमपि हन्तुमुद्युक्तं नृसिहावतारं धृत्वा जघान। नृसिंहावतारः तामसदुष्टशक्तौ सात्त्विकसच्छक्तिविजयः इति वदन्ति। नृसिंहकरावलम्बन स्तोत्रम् :-

**१.श्री मत्पयोनिधिनिकेतनचक्रपाणे**
**भोगीन्द्रभोगमणिराजितपुण्यमूर्ते।**
**योगीशशाश्वतशरण्यभवाब्धिपोत**
**लक्ष्मीनृसिंह मम देहि करावलम्बम्।।**

**२.ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि**
**संघट्टितांघ्रिकमलामलकात्रिकान्त।**
**लक्ष्मीलसत्कुचसरोरुहराजहंस**
**लक्ष्मीनृसिंह मम देहिकरावलम्बम्।।**

**३.संसारसागरविशालकराळकाल**
**नक्रग्रहग्रसननिग्रहविग्रहस्य**
**मग्नस्य रागलसदूर्मिनिपीडितस्य**
**लक्ष्मीनृसिंह मम देहि करावलम्बम्।।**



# समुद्रमन्थनम्

- श्रीमति विजय भट्ट

आसीत् पुरा शीघ्रकोपी इति प्रथितः दुर्वासोनाम कश्चित् मुनिः। सः इन्द्राय सुरवनिताप्तां काञ्चित् दिव्यमालां दत्तवान्। दुर्वासमुनिना दृष्टः इन्द्रः तां मालां तस्य गजस्योपरि अस्थापयत्। हन्त! गजः तां क्षित्यां क्षिप्त्वा अमृद्नात्। तेन तावता कोपाविष्टेन मुनिना इन्द्रः शप्तः। द्राक् अजरः इन्द्रः जरात्वं अवाप। देतेन अपि बलहीनाः भूत्वा कलहप्रियैः असुरैः पराजिताः। किमधुना प्रतिपत्तव्यमिति चिन्ताग्रस्ताः देवाः शिवेन सार्धं ब्रह्माणं प्रति अगच्छन्। ततः ब्रह्मणा साकं हरिमुपेत्य तैः हरौ स्तूयमाने सुप्रीतः हरिः तेषां पुरतः प्रादुर्भूय एवमवाच “भवन्तः असुरैः सह सन्धिं समासाद्य समुद्रमन्धनं कृत्वा अमृतं प्राप्नवन्तु” इति।

देवेषु दानवैः संधानं कृतवत्सु सर्वे मिलित्वा मन्थनार्थं मन्दराद्रिम् आनेतुम् उद्युक्ताः। मध्येमार्गं भारोद्वहनात् श्रान्ताः सुरासुराः अद्रिं पातितवन्तः। द्राक् श्रीहरिरेव तत्रागत्य अद्रिं गरुडस्योपरि उद्वहन् पयोधौ अस्थापयत्। श्रीहरिणा मन्थनार्थं वासुकिम् आदाय अद्रिं संवेष्टयित्वा सर्वेषु उत्साहं वर्धयितुं आदौ मन्थने भाग स्वामी बभूव।

तदनु उत्साहेन सुरासुराः मन्थनम् चक्रुः। यदा मन्दराद्रिः पुनः जले निमग्नः जातः तदा दुःखितान् देवान् दृष्ट्वा श्रीहरिः एव कूर्मो भूत्वा अद्रिं जलधेः बहिरानयति स्म। मन्थनजवात् यदा अद्रिः उत्पतन् आसीत् तदा अपि श्रीहरिः निजकरम् अद्रेः उपरि संस्थाप्य मन्थने साहाय्यम् अकरोत्। एवं सुरासुरेषु मन्थनं कुर्वत्सु सत्सु सर्वं पश्यद्भिः ब्रह्मादिभिः सन्तोषेण अक्रियत।

अग्रे सरभसं प्रवर्धमाने मन्थने प्रथमं पयोनिधेः कालकूटविषः उद्भूतः। देवेषु दुःखितेषु गिरीशः झटिति तं विषं पीत्वा कण्ठे संस्थाप्य नीलकण्ठः इति नाम अवाप। परं सुरासुरेषु पश्यत्सु अम्बुधेः बहिरागतां कामधेनुं श्रीहरिः क्षिप्रं मुनिजनाय अददात्। ततः परम् आगतेषु केचन अश्वः गजः कौस्तुभरत्नं, कल्पतरुः अप्सरसः च सन्ति। कौस्तुभं विहाय अन्ये सर्वे स्वर्गिणां कृते श्रीहरिणा दत्ताः कौस्तुभरत्नं तु श्रीहरिरेव स्वी चकार।

यदा इतोऽपि मन्थनं कृतवन्तः सर्वेषु पश्यत्सु लक्ष्मीदेवी बहिरागतवती। कमनीयां तां विलोक्य सर्वे स्पृहयन्तः आसन्। तावता ऋषिमुनयः स्तुतिभिः ताम् अभिषिच्य अन्वभूषन्। श्रीहरावेव दत्तहृदया देवी तस्मै वरणस्रजं समर्पितवती। पुनः मन्थने प्रवर्धमाने निर्गतां मदकारिणीं वारुणीं महासुरेभ्यः अददात्। अहो! अन्ते कराभ्याम् अमृतकलशं वहन् धन्वन्तरिः एव बहिरागतः।

अञ्जसा अमृतं प्रपीत्सवः असुराः तस्य कराभ्याम् अमृतकलशम् अपहृतवन्तः। तावता विवशान् सुरान् दृष्ट्वा तेषां साहाय्यं कर्तुं सुन्दरयुवती रूपेण तत्र प्रादुर्भूतः। दनुजमोहकारिणीं दृष्ट्वा तस्या उरोजकुम्भेनाकृष्टा असुराः कलहं त्यक्त्वा तस्याः अन्तिकमेत्य अयाचन्त - “का त्वं मृगाक्षि? कुतः समागता असि? किं चिकीर्षसि? इमां सुधां विभजस्व” इति।

“हे दैत्याः! कथं मयि एवं विश्वस्यते?” इति कामविवशान् एनान् वदन्ती सा इतोऽपि तेः विश्वासं सम्पादितवती। सुधाकलशं तेभ्यः स्वीकृत्य “मम दुश्चेष्टितं सहध्वम्” इति कथयन्ती सुरासुराणां पङ्क्तिप्रभेदं प्रकल्प्य सर्वान् उपवेश्य मन्दहासपूर्वकं लीलया सुधां व्यदधात्।

मोहिनीवेषधारी श्रीहरिः सुधां स्वभक्तेषु सुरेषु एव विभज्य समार्पियति स्म। स्वर्भानुनामकः (राहुः) सुरासुराणां मध्ये प्रविश्य सुधां पीतवान् इति ज्ञात्वा हरिणा निजरुपेण तस्य शिरः छित्वा अन्तर्हितः। पुनः सुरासुराणां मध्ये कलहः प्रारब्धः। घोरे रणे सुराः बलिदैत्येन व्यामोहिताः। तस्मिन् क्षणे श्रीहरिः पुनः आविर्भूय कालनेमीत्यादीन् हत्वा अन्तर्हितः। इत्थङ्कारं श्रीहरेः समुद्रमन्थनात् अमृतं लब्ध्वा प्रत्युपलब्धचेतसः अभवन् सुराः।

।।भक्तजनरक्षकाय श्रीहरये नमः।।

# हनुमत्पूजाविधानम्



प्रातःकाले निद्रोत्थितैः स्नानादिनित्यकृत्यान्याचर्य शुद्धैः पवित्रै तुलसीपुष्पफलादिपूजाद्रव्याणि संसिद्धानि कृत्वा हनुमत्पटस्य वा विग्रहस्य वा यथा विधिपूजा कर्तव्या।

श्रीकेशवादिनामभिः आचम्य पश्चात् प्राणायमंसमाचर्य संकल्पयेत्।

घण्टानादानन्तरं प्राणोयाममाचर्य शुभतिथौ..... गोत्रस्य नामधेयस्य .... धर्मपत्नी समेतस्य सकुटुम्बस्य सपुत्रकस्य सपौत्रकस्य, सभ्रातृकस्य, सबन्धवस्य सपरिवारस्य क्षेमस्थैर्य, धैर्य, विजय, अभय, आयुरारोग्य ऐश्वर्याभिवृद्धयर्थं धर्मार्थकाममोक्ष चतुर्विधफल पुरुषार्थसिद्ध्यर्थं श्रीहनुमद्देवतामुद्दिश्य हनुमद्देवताप्रीत्यर्थे षोडशोपचारपूजां करिष्ये इति संकल्प्य कलशराधनं कृत्वा - कलशे हस्तं निक्षिप्य -

### कलशपूजा -

तदङ्गकलशाराधनं करिष्ये, कलशं गन्धपुष्पाक्षतैरभ्यर्च्या।
कलशस्य मुखे विष्णुः कण्ठेरुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तुसागरास्सर्वे सप्तद्वीपा वसुन्धरा
ऋग्वेदोऽथ यजुर्वेदस्सामवेदो ह्यथर्वणः।
अङ्गैश्च सहितास्सर्वे कलशाम्बु समाश्रिताः।
गङ्गेच यमुने चैव गोदावरि! सरस्वति।।
नर्मदे सिन्धकावेर्यौ जलेऽस्मिन् सन्निधिंकुरु।।
कावेरी तुङ्गभद्रा च कृष्णवेणी च गौतमी।
भागीरथीति विख्याताः पञ्चगङ्गाः प्रकीर्तिताः।।
आयान्तु देवपूजार्थं दुरित क्षयकारकाः।।

कलशजलं पुष्पैर्वा तुलसीपत्रैर्वा दैवप्रतिमायां आत्मन्यपि प्रोक्षिप्य पूजाद्रव्योपर्यपि प्रोक्षिप्य आदौ संकल्पितपूजा निर्विघ्नेन परिसमाप्त्यर्थं श्रीमहागणपतिपूजां करिष्ये (गणपतिपूजानन्तरं) पूर्वं संकल्पित हनुमत्पूजां करिष्ये इति पूजारम्भः कर्तव्यः। संकल्पः.... पूर्वोक्त...... शुभतिथौ श्रीहनुमद्देवता प्रीत्यर्थं षोडशोपचार पूजां करिष्ये।

### ध्यानम् -

मर्कटेश महोत्साह सर्वलोक विनाशन।
शत्रून् संहर मां रक्ष श्रियं दापय मे प्रभो।
स्पटिकाभं स्वर्णकान्तिं द्विभुजञ्चकृत्वाञलिं
कुण्डलद्वयसंशोभि मुखाम्भोजं मुहुर्मुहुः।।
श्रीहनुमते नमः ध्यायामि।

### आवाहनम् -

रामचन्द्रपदाम्भोजयुगलस्थिरमानसं
आवाहयामि वरदं हनुमन्तमभीष्टदं
श्रीहनुमते नमः आवाहयामि।

### सिंहासनम् -

नवरत्ननिबद्धाश्रं चतुरश्रं सुशोभनं
सौवर्णमासनं तुभ्यं दास्याभि कपिनायक
श्रीहनुमते नमः सुवर्णरत्नसिंहासनं समर्पयामि।

### पाद्यम् -

सुवर्णकलशानीतं गङ्गादि सलिलैर्युतं
पादयोः पाद्यमनघं प्रतिगृह्य प्रसीद मे
श्रीहनुमते नमः पादयोः पाद्यं समर्पयामि।

### अर्घ्यम् -

कुसुमाक्षतसम्मिश्रं प्रसन्नाम्बु परिप्लुतं
अनर्घ्यमर्घमधुना गृह्यताकपिपुङ्गव
श्रीहनुमते नमः मुखे आचमनीयं समर्पयामि।

मधुपर्कम् -

मध्वाज्य क्षीरमिलितं शर्करादधिसंयुत
अर्पये मधुपर्कं ते स्वीकुरु त्वं दयामय
श्रीहनुमते नमः मधुपर्कं समर्पयामि

पञ्चामृतस्नानम् -

मध्वाज्यक्षीरदधिभिः सगुडैर्मन्त्रपालितैः
पञ्चामृतैः पृथग्जातैस्सिञ्चामि त्वां कपीश्वर।
श्रीहनुमते नमः पञ्चामृतस्नानं समर्पयामि।
श्रीहनुमते नमः शुद्धोदकस्नानं समर्पयामि।
स्नानानन्तरं आचमनीयं समर्पयामि.

वस्त्रम् -

ग्रथिनां नवरत्नैश्च मेखलां त्रिगणीकृतां
अर्पयामि कपीशत्वं गृहाण महतां वर
श्रीहनुमते नमः वस्त्रयुग्मं समर्पयामि
वस्त्रधारणानन्तरं आचामनीयं समर्पयामि।
(इत्युक्त्वा बृहद्वस्त्रं सम्बध्य भुजद्वयात् उपरिवस्त्रं लम्बमानमिव धारणीयम्)

यज्ञोपवीतम् -

श्रौतस्मार्तादिकृत्यानां साङ्गोपाङ्गफलप्रदं
यज्ञोपवीतमनघ धारयानिलनन्दन
श्रीहनुमते नमः यज्ञेपवीतं समर्पयामि।
गन्धम् सिन्दूरम् -
दिव्यसिन्दूर कर्पूर मृगनाभि समन्वितं
सकुङ्कुमं पीतगन्धं ललाटे धारयानघ
श्रीहनुमते नमः गन्धसिन्दूराणि समर्पयामि
(इत्युक्त्वा सुवासनागन्धद्रव्याणि, सिन्दूरञ्च विग्रहमुखे, पादयोः स्थापनीयम्। गन्धं पूर्वमेव संसिद्धं कर्तव्यम्।

पुष्पाक्षताः -

नीलोत्पलैः कोकनदैः कल्हारकमलैरपि
कुमुदैः पुण्डरीकैस्त्वां पूजयामि कपीश्वर
श्रीहनुमते नमः परिमलपुष्पक्षतान् समर्पयामि।
(इत्युक्त्वा विग्रहः पुष्पैः सम्यक् अलङ्करणीयम्)

अङ्गपूजा -

श्रीहनुमते नमः - पादौ पूजयामि
श्रीसुग्रीवसखाय नमः - गुल्फौपूजयामि
श्री अङ्गदमित्राय नमः - जंघे पूजयामि
श्री रामादासाय नमः - ऊरू पूजयामि
श्री अक्षघ्नाय नमः - कटिं पूजयामि
श्रीलङ्कादहनाय नमः - वालं पूजयामि
श्रीराममणिदाय नमः - नाभिं पूजयामि
श्रीसागरोल्लंघनाय नमः - मध्यं पूजयामि
श्रीलङ्कामर्दनाय नमः - केशावलिं पूजयामि
श्रीसञ्जीवनिहर्त्रे नमः - स्तनौ पूजयामि
श्रीकुण्ठितदशकण्ठाय नमः - कण्ठं पूजयामि
श्रीरामाभिषेककारिणे नमः - हस्तौ पूजयामि
श्रीमन्त्ररचितरामायणाय नमः - वक्त्रं पूजयामि
श्रीप्रसन्नवदनाय नमः - वदनं पूजयामि
श्रीपिङ्गनेत्राय नमः - नेत्रे पूजयामि
श्रीश्रुतिपारगाय नमः - कर्णौ पूजयामि
श्री ऊर्ध्वपुंड्रधारिणे नमः - कपोले पूजयामि
श्रीमणिकण्ठमालिने नमः - शिरः पूजयामि
श्रीसर्वाभीष्टप्रदाय नमः - सर्वाण्यङ्गानि पूजयामि

ततः १३ पुटः अष्टोत्तरशतनामपूजां समर्पयामि
घण्टां वादयन् दीपः देयः -

धूपम् -

दिव्यं सगुग्गुलुं रम्यं दशाङ्गेन समन्वितम्
गृहाणमारुते धूपं सुप्रियं घ्राणतर्पणम्
श्रीहनुमते नमः, दिव्यपरिमलधूपमाघ्रापयामि
(एवमुक्त्वा विग्रहस्य सम्यक् धूपवासनां व्यप्तिपर्यन्तं धूपं देयम्)
(घृतवर्तिकात्रयं एकं कृत्वा प्रज्वाल्य सर्व प्रदर्शनाय भ्रमणं कर्तव्यम्)

दीपः -

घृतवर्ति समुज्ज्वालाशतसूर्यसमप्रभं
अतुलं तव दास्यामि व्रतपूर्त्यै सुदीपकम्।
श्रीहनुमते नमः दीपं दर्शयामि
(एवमुक्त्वा देवाय दीपं दर्शननीयम्)
ततः धूपदीपानन्तरं आचमनीयं समर्पयामि
इत्युक्त्वा उद्धरिणीजलं देवमुखाय दर्शयित्वा अर्घ्यपात्रे पातनीयम्। ज्ञातव्यवषियः - उपचारैः दीयमान दीपं आरार्त्तिकमिव नयनसन्निधिं नानेतव्यम्)

# श्रीमदाञ्जनेयाष्टोत्तरशतनामावलिः



नाम्नः पूर्वं ओं अन्ते नमः इति वक्तव्यम्

ओं आञ्जनेयाय नमः
ओं महावीराय नमः
ओं हनुमते नमः
ओं मारुतात्मजाय नमः
ओं तत्त्वज्ञानप्रदाय नमः
ओं सीतादेवीमुद्राप्रदाय नमः
ओं अशोकवनिकाछेत्रे नमः
ओं सर्वमायाविभञ्जनाय नमः
ओं सर्वबन्धविमोक्त्रे नमः
ओं रक्षोविघ्नकारकाय नमः 10
ओं परविद्यापरीहाराय नमः
ओं परशौर्यविनाशकाय नमः
ओं परयन्तनिराकर्त्रे नमः
ओं परमन्त्रप्रभेदकाय नमः
ओं सर्वग्रहविनशक्ताय नमः
ओं भीममेन सहायकृते नमः
ओं सर्वदुःखहराय नमः
ओं सर्वलोकचारिणे नमः
ओं मनोजवाय नमः
ओं पारिजातद्रुमूलस्थाय नमः 20
ओं सर्वमन्त्रस्वरूपाय नमः
ओं सर्वतन्त्रस्वरूपाय नमः
ओं कपीश्वराय नमः
ओं महाकायाय नमः
ओं सर्वरोगहराय नमः
ओं प्रभवे नमः
ओं बलसिद्धिकराय नमः
ओं सर्वविद्यासम्पत्प्रदाय नमः
ओं कपिसेनानायकाय नमः
ओं भविष्यच्चतुराननाय नमः 30
ओं कुमारब्रह्मचारिणे नमः
ओं रत्नकुण्डलदीप्तिमते नमः
ओं सञ्चलद्वालसन्नद्धलम्बमानशिखोज्ज्वलाय नमः
ओं गन्धर्वविद्यातत्त्वज्ञाय नमः
ओं महाबलपराक्रमाय नमः
ओं कारागृहविमोक्त्रे नमः
ओं श्रृङ्खलाबन्धमोचकाय नमः
ओं सागरोत्तारकाय नमः
ओं प्राज्ञाय नमः
ओं रामदूताय नमः 40
ओं प्रतापवते नमः
ओं वानराय नमः
ओं केसरीसुताय नमः
ओं सीताशोकनिवारकाय नमः
ओं अञ्जनागर्भसम्भूताय नमः
ओं बालार्कसदृशाननाय नमः
ओं विभीषणप्रियकराय नमः
ओं दशग्रीवकुलान्तकाय नमः
ओं लक्ष्मण प्राणदात्रे नमः
ओं वज्रकायाय नमः 50
ओं महाद्युतये नमः
ओं चिरञ्जीविने नमः
ओं रामभक्ताय नमः
ओं दैत्यकार्यविघातकाय नमः
ओं अक्षहन्त्रे नमः
ओं काञ्चनाभाय नमः
ओं पञ्चवक्त्राय नमः
ओं महातपसे नमः
ओं लङ्किणीभञ्जनाय नमः
ओं श्रीमते नमः 60
ओं सिंहिकाप्राणभञ्जकाय नमः
ओं गन्धमादनशैलस्थाय नमः
ओं लङ्कापुरविदाहकाय नमः
ओं सुग्रीवसचिवाय नमः
ओं धीराय नमः
ओं शूराय नमः
ओं दैत्यकुलान्तकाय नमः
ओं सुरार्चिताय नमः
ओं महातेजसे नमः
ओं रामचूडामणिप्रदात्रे नमः 70
ओं कामरूपाय नमः
ओं पिङ्गलाक्षाय नमः
ओं वार्धिमैनाकपूजिताय नमः
ओं कबलीकृतमार्ताण्डमण्डलाय नमः
ओं विजितेन्द्रियाय नमः
ओं रामसुग्रीवसन्धात्रे नमः
ओं महारावणमर्दनाय नमः
ओं स्फटिकाभाय नमः
ओं वागधीशाय नमः
ओं नवव्याकृतिपण्डिताय नमः 80
ओं चतुर्बाहवे नमः
ओं दीनबन्धवे नमः
ओं महात्मने नमः
ओं भक्तवत्सलाय नमः
ओं सञ्जीवननगाहर्त्रे नमः
ओं शुचये नमः
ओं वाग्मिने नमः
ओं दृढव्रताय नमः
ओं कालनेमिप्रमथनाय नमः
ओं हरिमर्कटमर्कटाय नमः 90
ओं दान्ताय नमः
ओं शान्ताय नमः
ओं प्रसन्नात्मने नमः
ओं दशकण्ठमदाहृते नमः
ओं योगिने नमः
ओं रामकथालोलाय नमः
ओं सीतान्वेषणमण्डिताय नमः
ओं वज्रद्रंष्ट्राय नमः
ओं वज्रनखाय नमः
ओं रुद्रवीर्यसमुद्भवाय नमः 100
ओं इन्द्रजित्प्रहितामोघ
ब्रह्मास्त्रविनिवारकाय नमः
ओं पार्थध्वजाग्रसंवासिने नमः
ओं शरपञ्जरभेदकाय नमः
ओं दीर्घ(दश)बाहवे नमः
ओं लोकपूज्याय नमः
ओं जाम्बवप्रीतिवर्धनाय नमः
ओं सीतासमेतश्रीरामपादसेवा
ओं धुरन्धराय नमः 108

ओं श्रीमदाञ्जनेयस्वामिने नमः

अष्टोत्तरशतनामपूजां समर्पयामि।

नैवेद्यम् -

मणिपात्र सहस्राढ्यं दिव्यान्नं घृतपायसं
आपूपलड्डुकोपेतं मधुराम्रफलैर्युतम्
हिंगूजीरकसंयुक्तं षड्रसोपेतमुत्तमं
नैवेद्यमर्पयाम्यद्य गृहाणेदंकपीश्वर

यथाविधि निवेदनं कुर्यात्, मध्येमध्ये पानीयं समर्पयामि।

उत्तरपोशनं समर्पयामि, हस्तप्रक्षालनं समर्पयामि।

मुखप्रक्षलनं समर्पयामि पादप्रक्षालनं समर्पयामि गूण्डूषं समर्पयामि। शुद्धाचमनीयं समर्पयामि। एवमुक्त्वा पञ्चवारं उद्धरिणीजलं अर्घ्यपात्रेपातनीयम् ।

(ताम्पूले पूगत्रयं नागवल्लीपत्रद्वयं वा पूगद्वयं वा, नागवल्लीपत्रत्रयं वा निवेशनीयम्। इदं ताम्बूलप्रदानविधानम्।

ताम्बूलम् -

नागवल्ली दलोपेतं क्रमुकैर्मधुरैर्युतम्
ताम्बूलमर्पयाम्यद्य कर्पूरादिसुवासितम्
श्रीहनुमते नमः, प्रदक्षिणताम्बूलं समर्पयामि।

एवमुक्त्वा स्वामिने ताम्बूलं समर्पनीयम् (घण्टानिनादः कर्तव्यः)

कर्पूरनीराजनम् -

आरार्तिकं तमोहारि शतसूर्यसमप्रभं
अर्चयामि तवप्रीत्यै अन्धकार निषदनम्
श्रीहनुमते नमः कर्पूरनीराजनं समर्पयामि

एवमुक्त्वा स्वामिने वारत्रयं पाददिशिरःपर्यन्तं सर्वेषु कर्पूरकान्तौ स्वामि दर्शनं प्राप्य सानन्देषु सत्सुविग्रहाय दक्षिणदिशि आरार्तिकं देयम् आरार्तिकालम्बनस्थालं शनैः भक्तिप्रपत्तिभिः भ्रामणीयम्। नीराजनानन्तरं आचमनीयं समर्पयामि

मन्त्रपुष्पम् -

आञ्जनेयाय विद्महे! वायुपुत्राय
धीमहि तन्नो हनुमत्पचोदयात्।

श्रीहनुमते नमः। सुवर्णदिव्यमन्त्रपुष्पं समर्पयामि।

(एवं भक्त्या हस्ते पुष्पाणि स्वीकृत्य हनुमन्तं स्मरन् स्वामिपादपद्मयो समर्पणीयम्। अस्मत्हत्पुष्प समर्पणमिव भावनीयम्। पूजाभागिभ्यः सर्वेभ्यः पुष्पाणि दत्वा भक्त्य स्थाले पातयन्तु इत्युक्त्वा ततः कलशजलं पुष्पेण प्रकीर्य सर्वसमर्पितपुष्पाणि भगवत्पादयोः समर्पणीयम्। पशचत् सर्वैः नमस्कृतिः कर्तव्या)

प्रदक्षिणनमस्कारः -

प्रदक्षिणनमस्कारान् साष्टाङ्गन् पञ्चसंख्यया
दास्यामि कपिनाथाय गृहण सुप्रसीदमे

श्रीहनुमते नमः आत्मप्रदक्षिण नमस्कारान् समर्पयामि।

वामदिग्भागात् दक्षिणदिग्भागपर्यन्तं नमस्कारमुद्रया पञ्चवारं प्रदक्षिणं कर्तव्यम्। छत्रं धारयामि, चामरैर्वीजयामि, नृत्यं दर्शयामि। गीतं श्रावयामि दर्पणं दर्शयामि उष्ट्रानावाहयामि, वाद्यं समस्तराजोपचार भक्त्युपचार शक्त्युपचार पूजां समर्पयामि।

(एवमुक्त्वा पुष्पाणि अक्षतान् स्वामिपादयोः समर्प्य नमस्कृतिः कर्तव्या)

अनया..... पूजया श्रीहनुमद्देवः सुप्रीतः सुप्रसन्नो वरदोभवतु सर्वेजनास्सुखिनो भवन्तु।

पुष्पाञ्जलिः -

श्लो।।वैशाखे मासि कृष्णायां दशम्यां मन्दवासरे।
पूर्वाभाद्रप्रसूताय मङ्गलं श्रीहनुमते।।
श्लो।।करुणारसपूर्णाय फलापूपप्रियाय च।
माणिक्यहारभूषाय मङ्गलं श्रीहनूमते।
श्लो।।सुवर्चलाकलत्राय चतुर्भुज धराय च।
उष्ट्रारूढाय वीराय मङ्गलं श्रीहनूमते
श्लो।।दिव्यमङ्गलदेवाय पीताम्बरधराय च।
तत्पकाञ्चनवर्णाय मङ्गलं श्रीहनूमते।।
श्लो।।भक्तरक्षणशीलाय जानकी शोकहारिणे।
ज्वलत्पावकनेत्राय मङ्गलं श्रीहनूमते।।
श्लो।।पम्पातीरविहाराय सौमित्रिप्राणदायिने।
सृष्टेः कारणभूताय मङ्गलं श्रीहनूमते।।
श्लो।।रम्भावनविहाराय गन्धमादन वासिने।
सर्वलोकैकनाथाय मङ्गलं श्रीहनूमते।।
श्लो।।पञ्चाननाय भीमाय कालनेमिहराय च।
कौण्डिन्यगोत्रजाताय मङ्गलं श्रीहनूमते।।

श्रीहनुमते नमः पुष्पाञ्जलिं समर्पयामि।

श्री न च रघुनाथाचार्यप्रणीता

# श्रीशेषाद्रीशस्तुतिः

## सुवर्णसौरभव्याख्या समेता

## चित्तमत्तगजबन्धनम्

(तदनन्तरम्)

व्याख्याता - डा. कन्दाल लक्ष्मीनारायणः
चरवाणी - ९९८५२३७३५३

श्लो.२१.

**वृषगिरिवरनाथ! मत्वास्य चित्तस्य सम्विभ्रतः**
**मदुभरविशरारूदन्तावलस्येव दुश्चेष्टितम्।**
**शुभतरमुपधातु ते पादयुग्मं दृढालानताम्**
**वहतु च करुणा तवैतस्य बन्धाय रज्ज्वाकृतिम्।।**

ता - स्वामिन् श्रीवेङ्कटाधीश्वर! मम मनः मदगजसदृशम्। तत् सकलेष्वपि विषयेषु सर्वदा स्वेच्छया सञ्चरति। मदातिशयेन अत्यन्तं हिंसास्वभावं भवति च। तेनैव मदेन सोदुम् अशक्यानि दुष्कृतानि कर्तुं चिन्तयति च। एतादृशं मत्तदन्तावलसन्निभं मम चित्तम् आक्रष्टुं निग्रहीतुं च भवतः श्रीचरणद्वन्द्वमेव आलानम् इव दृढतरं साधनम्। तथा तव परमकृपैव तस्य बन्धाय सुवृत्ता रज्जु रिव पर्थाप्ता भवति। अतः भगवन्! तव श्रीपादपद्मयुगले मम भक्तिं प्रकल्पय। तथैव मे चित्तस्य विषयान्तरेषु प्रीतिं प्रवृत्तिं च निर्वर्त्य त्वयि एव निश्चला भक्तिः यथा भवति तथा अनुगृष्णीस्व।

सु.सौ.व्याख्या -

मनसः अत्यन्त चञ्चल स्वभावत्वात् प्रापञ्चिकविषय सुखेषु आसक्तं भूत्वा चित्तं तानि एव नित्यं ध्यायति। तेषाम् अलाभे क्रोधानिष्टं सत् अज्ञानेन बहुविधानि क्रूरकर्माणि आचरितुम् ईदृग्विधं दुष्क्रियासक्तं चित्तं नियन्तुं श्रीवेङ्कटेश्वरस्वामिनः दया एव अत्यन्तं समर्था, शक्ता च। अतः सा एव मम चित्तस्य स्थैर्यं कल्पयतु इति अस्मिन् श्लोके प्रार्थ्यते।

दुश्चेष्टितं सम्बिभ्रतः चित्तस्य - लौकिक विषयेषु अनुरक्तं सत् भगवति पराङ्मुखं च मानसम् अज्ञानात् स्वल्पम्





अशाश्वतं च भौतिकं सुखम् अनुभवितुं प्रयतते। तदप्राप्त्या कोपवशेन बहूनि हिंसारूपाणि कर्माणि आचरितुं चिन्तयति। तादृशी चिन्ता च इतरजनानां व्यथां कल्पयति। चित्तम् अनुसृत्य वाक् अपि परजनान् उद्दिश्य परुषतया भाषणेन तेषाम् बाधाम् आवहति। ताम् अनुसृत्य प्रहरणादि कर्माणि परान् पीडयन्ति। तदेव अत्र दुश्चेष्टितम्। इन्द्रियविषयेषु व्यापनशीलस्य चञ्चलस्वभावस्य मनसः एव एवंविधं विकृतत्वं भवति। **उक्तंच एतत् भगवद्गीतायां -**

**''चञ्चलं हि मनः कृष्ण! प्रमाथि बलवत् दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। ६.३४**

हे भगवान्! चित्तम् अत्यन्तं चञ्चलं खलु। तत् बलविशिष्टम् अतिकठिनम् परहिंसकं च। तादृशस्य अस्थिरस्य मनसः निग्रहणं वायोः निग्रहणम् इव कर्तुम् अतीव क्लेशकरम् इति।।

**दन्ताबलस्य दृढालानतां, रज्ज्वाकृतिम् -** अत्र मानसं दन्तावलः इति उपमीयते प्रशस्तौ दन्तौ अस्थस्तः इति दन्तावलो नाम गजः। 'दन्ती दन्तावलो हस्ती'' २.८.३४ इत्यमरः। गजस्थ इव चित्तस्य अपि अहङ्कार ममकाररूपौ तीक्ष्णाग्रौ द्वौ दन्तौ वर्तेते अतः तस्य गजसादृश्यम्। ताभ्यां मनोगजः विश्रृङ्खलप्रवर्तनेन सदा दुश्चेष्टितेष्वेव निरतो भवति।

तं मनोगजं नियन्तुम् आलानम् आवश्यकम्। आलानं नाम गजबन्धनस्तम्भः। आलानं बन्धस्तम्भे २.८४१ इत्यमरः तत् च अत्र श्रीनिवासस्य चरणयुगलमेव। भगवतः दिव्यचरणारविन्दयुगलं सौन्दर्य सौकुमार्यादिभिः सेवाकानां मनांसि तत्रैव संलग्नानि कृत्वा भौतिक विषयान् प्रीति चलितुम् अपि अशक्तानि कृत्वा वशीकरोति। श्रीनिवासपादयुग्मं मनसो बन्धप्रायमपि शुभकरम् एव।

गजस्य आलाने बन्धनार्थं रज्जुः आवश्यकी। एवम् अत्र मनोगजस्थ भगवच्चरणरूपे आलाने निग्रहणाय भगवतः कृपारूपं सूत्रम् आवश्यकम्। देवेदेवस्य दया एव स्वस्मिन् भक्तिं जनयित्वा तां वर्धयति तथा च परमात्मनः कृपैव लौकिकविषयवैराग्यपूर्वकं तस्मिन् भक्तिं प्रकल्प्य तच्चरणारविन्दनिष्ठताम् आपादयतीति भावः। सा एवात्र पार्थ्यते। तथैव अभिलषितं च भगवद्यामुनमुनिभिः -

''कृपयैवमनन्यभोग्यतां भगवन्! भक्तिमपि प्रयच्छमे' स्तो.२.५४ हे भगवन्! विषयान्तरानुभवेच्छा राहित्य पूर्वकं त्वपि एकान्तां भक्तिं मे देहि - इति। एवमेव भगवद्रामानुजाचार्यः अभ्यर्थितं च-

'ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा - श्रीभाष्यम् परब्रह्मणि श्रीनिवासे मे भक्तिरूपापन्नं ज्ञानं जायताम् - इति माधवस्य कृपया केवलं तदनुभवरूपा भक्तिः उत्पद्यते इति ताप्तर्यम्।

अयं श्लोकः पूर्ववत् महामालिकावृत्ते निबद्धः।

(अनुवर्तिष्यते)

# अक्षयतृतीया



वैशाखशुक्लतृतीया अक्षयतृतीयेति इदं पर्व पूर्वाह्णव्यापि इति व्रतराजे प्रोक्तम्। महापुण्यदिनमिदम्। अक्षयतृतीया सोमवारे वा बुधवारे वा आगता चेत् अत्यन्तपवित्रमिति वदन्ति। कृत्तिकारोहिणीनक्षत्रयुक्ता चेदियं अतिप्रशस्ता भवति। ''वैशाखे मासे राजेन्द्र शुक्लपक्षे तृतीयका अक्षया सा तिथिः प्रोक्ता कृत्तिका रोहिणीयुता'' इति शास्त्रोक्तिः। अस्मिन्दिने कृतदानानि महाफलप्रदानि। देवताः, पितृदेवताः अधिकृत्यं क्रियमाणाः पूजाः अक्षयफलं ददति। अत एव अक्षयेति नाम सार्थक्यं भवति। इदं लक्ष्मीदिनम्। अस्मिन् दिने यत् किमपि कार्यं प्रारभ्यते चेत् लक्ष्मीदेव्यनुग्रहात् शुभप्रदं स्यात्। स्वर्णाभरणादीनि क्रीतानिचेत् सम्पदभिवृद्धिः स्यात्। लक्ष्म्याः आशीर्वादं स्वीकृत्य सर्वेनूतनकार्यमारभन्ते। प्रथमजैनतीर्थङ्करः ऋषभनाथः ४०० दिनपर्यन्तंमुषित्वा इक्षुरसंपीत्वा उपवासाद्विरतः। तद्रूपज्ञापकार्थं पर्वदिनमिव अचरन्ति। अक्षयतृतीया दिने श्रीकृष्णः अरण्यवासे पाण्डवैः उपवासेन न भवितव्यमिति अक्षयपात्रं ददौ। भक्ताः, गणेशं, कुबेरं, लक्ष्मीं विष्णुं अस्मिन् दिने पूजयन्ति प्रातःकाल स्नानं, पूजा, देवेभ्यः नैवेद्यसमर्पणं, दानाचरणमस्मिन् दिने प्रधानकर्तव्यानि।





# रामानुज जयन्ती





- आचार्य जि.पद्मनाभम्,
चरवाणी -९२४७३२८२८६

वैशाखमासशुद्धषष्ठीतिथिः श्रीरामानुजाचार्यजयन्ति दिनम्। शङ्कररामानुजमध्वत्रिमताचार्येषु द्वितीयोऽयं विशिष्टाद्वैत मतोद्धारकः। अयं, क्रीस्तुशके १०१७ नलनामसवंत्सरे वैशाखशुद्धषष्ठ्यां बृहस्पतिवासरे जनिं लेभे। पिता आसूरिकेशवपेरुमाल्, माता कान्तिमती (भूमिपिरट्टियारु), चेन्नपुरीसमीपे ''श्रेपेरुम्बुदूरु'' नगरमस्य जन्मस्थलम्। प्राथमिकविद्यां पितृद्वारा प्राप्य ततः काञ्चीपुरं प्रेषितः यादव प्रकाश गुरुद्वारा वेदान्तविद्यामभ्यस्तवान्। मूलव्याख्याने गुरुशिष्ययोर्मध्ये भेदाः जाताः। यादवप्रकाशे राजपुत्रिकापिशाचपीडापरिहरणे असमर्थे जाते रामानुजाचार्याः तत्पिशाचग्रहपीडां निवारयामास। ईर्ष्यया शिष्यद्वारा काशीप्रयाणमर्गमध्ये यादवप्रकाशः रामानुजाचार्यं हन्तुं प्रायतत। रामानुजसमीपबन्धुः गोविन्दभट्टः पूर्वमेव यादवप्रकाशप्रयत्नं ज्ञात्वा तत्प्रमादात् रामानुजाचार्यं ररक्ष। रामानुजः तथा रक्षितः मार्गमध्ये प्रतिनिवृत्तः काञ्चीमाजगाम। ततः मातुरुपदेशात् परिणीय कञ्चीवरदराजसेवायां कालं यापयति स्म। आळवन्दारुनामकः श्रीरङ्गस्थ वैष्णवगुरुः रामानुजप्रतिभां ज्ञात्वा स्वशिष्यं पेरियनम्बिं तमानेतुं प्रेषयामास। आलवन्दरुप्रतिष्ठां ज्ञात्वा रामानुजोऽपि श्रीरङ्गं गन्तुं सन्नद्धः आसीत्। परन्तु वृद्धः आलवन्दारुः अनारोग्यात् किञ्चित्समयपूर्वमेव आसून् तत्यजेति शुश्राव। रामानुजः प्रतिनिवृत्य पुनः कञ्चीं प्राप्य आलवन्दरुप्रधानशिष्यपेरियनम्बि-सकाशं जगाम। मधुरान्तके नगरे रामानुजः पेरियनम्बि महाशयस्य शिष्यः बभूव। रामानुजपेरियनम्बिभार्ययोः परस्परवैषम्यात् पेरियनम्बिः रामानुजगृहात् श्रीरङ्गंजगाम। स्वभार्यादुर्गुणदुश्चेष्टापीडितः रामानुजः कञ्चीं परित्यज्य सन्यासं स्वीचकार। आलवन्दरुणा श्रीरङ्गाध्यक्षपीठमलङ्कतुम् आहूतोऽपि अहमसमर्थोस्मीति वैष्णवागमान् सम्यक् पठितुं प्रारेभे। शिष्यत्वेन आत्मानं स्वीकर्तुं षड्वारं संप्रार्थ्य गुरुं, सप्तसवारे गुर्वनुमतिं प्राप्य शिष्यत्वेन गुरुद्वारा मन्त्रपदेशं प्राप्य तन्मन्त्र रहस्यं यस्य कस्यापि न वक्ष्यामीति गुरोः वाग्दानञ्चकार। मोक्षसम्पादनार्थं तन्मन्त्रशक्तिः महाप्रभावोपेता इति ज्ञात्वा परमानन्दभरितः जातः। ततः मानवेभ्यः सुलभमोक्षप्रदमन्त्ररहस्यं गूहयितुमनिच्छत् प्रेमपरोपकारहृदयः रामानुजः तन्मन्त्ररहस्यं सर्वेभ्यः उपदिदेश। गुरुः तिरुक्कोटियर्नम्बिः ''रामानुजः मन्त्ररहस्यं सर्वेभ्यः उपदिदेश इति ज्ञात्वा तमाहूय कोपोद्रिक्तः रामानुजमाहूय त्वं शाश्वतं नरकं प्राप्स्यसीत्यवोचत्। जनसमूहमोक्षप्राप्तेः यद्यहं हेतुभूतः अहं नरकं प्राप्तुं सानन्दं संसिद्धोऽस्मीत्यवोचत्। गुरुः तस्य उन्नतादर्शं ज्ञात्वा आशिषः प्रयुज्यः तव प्रयत्नः अवश्यं सफलः स्यादित्यवोचत्। रामानुजस्य परोपकारहृदयः सर्वैः ज्ञातः। स्वसिद्धान्तप्रचारे बहुवादेषु विजयमवाप। यज्ञमूर्तिनामकः अद्वैती श्रीरङ्गे रामानुजेन षोडशदिनपर्यन्तं वादं कृत्वा पराजितः वैष्णवं स्वीकृत्य स्वनामापि ''पेरुमालू एम्बेरुनामारु'' इति परिवर्तयामास।

ततः रामानुजाचार्यः ब्रह्मसूत्राणां बोधायनवृतिं लिखितु ममंस्त। शिष्येषु कुरत्तल्वारु ग्रन्थमिमं कण्टस्थीकृत्वा रामानुजेन

पृष्टः यथातथं श्रावयतिस्म। एवं बहुवारं श्रुत्वा रामानुजः ब्रह्मसूत्राणां श्रीभाष्यं चकार। ततः वेदान्तसारः, वेदान्तसंग्रहः वेदान्तदीपः, इति ग्रन्थान् भगवद्गीतायाः भाष्यञ्च व्यरचीत्। ग्रन्थरचनानन्तरं पण्डितामोदसम्पादनार्थं देशाटनं कृत्वा काश्मीरपण्डितमण्डल्यां स्वग्रन्थान् श्रावयामास। सर्वे पण्डिताः तं अभिननन्दुः। तिरुपति पट्टणे पूजादिविषये मध्यवर्तीभूत्वा विवादान् परिष्कृत्य वैष्णवप्राबल्याय नियमनिबन्धनानि आमोदयोग्यानि चकार।

ततः कुरुत्ताल्वारुपुत्रपराशरभट्ट नाम्ना विष्णुसहस्रनाम्नां भाष्यं लेखयामास। स्वबन्धुना तिरुक्कुरप्पिसन्पिल्लरुनामकेन तिरुवायिमळिग्रन्थस्य भाष्यं लेखयामास।

पश्चात् कुलोत्तुङ्गचोलः राजा शैवः शिवादन्यत् दैवं नास्तीति रामानुजेन अङ्गोकर्तुं निर्बन्धश्चकार। वैष्णवमतप्रचाराय प्रधानावरोधोयं जातः। तदा राज्ञा आहूतः रामानुजः स्व स्थाने कुरुत्तल्वारुमहाशयं स्ववस्त्रधारिणं कृत्वा राजसकाशं प्रेषयामास। राजा स एव रामानुजः इति शिवपारम्यं अनङ्गीकृत नयनविहीनश्चकार। तदा रामानुजः वायसलबिन्तिदेवराज्यं पलायितः कावेरीतीरे प्रयाणं कुर्वन् सालिग्रामं प्राप्य द्वादशवर्षान् तत्रैव कालं यापयामास। वादे जैनान् पराजित्य बित्तिदेवं वैष्णवश्चकार। श्रीचन्दनान्वेषणे मेल्कोटे प्रान्ते कञ्चनदेवालयं दृष्ट्वा ढिल्लीराजभवनस्य रामप्रियनायकविग्रहमानीय मेल्कोटे देवालये प्रतिष्ठापयमास। ढिल्ली नगरात् विग्रहानयनकाले पञ्चमकुलस्थेभ्यः आश्रयं प्राप्तःतत्कृतज्ञतया मेल्कोटे देवालये रथोत्सवकाले पञ्चमानां आलयप्रवेशं कारयामास। चोलराजकुलोत्तुङ्गमरणानन्तरं श्रीरङ्गं प्रतिनिवृत्य वैष्णवमतप्रचाराय चतुस्सप्ततिशिष्यान् नियुयोज। तेषु चत्वार स्वभाष्यप्रतिरक्षकाः आसन्। ब्रह्मसूत्रगीतातर्कादीनां भाष्यरचनया भाष्यकारः इति "एम्बेरुमाळारु इति त्रिदण्डसन्न्यासत्वात् यतिराजः इति नाम्ना प्रसिद्धः आदिशेषां शसम्भूतः इत्यपि ख्यातिमभजत। रामानुजः श्रीरङ्गे मोक्षमण्डपं काञ्चीवरदक्षेत्रं त्यागमण्डपं, तिरुपतिं पुष्पमण्डपं चकार। श्रीरङ्गे शिथिलालयं पुनरुद्धारयामास। पूजाविधाने समुचित नियमान् सुव्यवस्थितान् चकार। सांघिकदृष्ट्या मतप्रचारे मुक्तेः स्त्रीपुरुषभेदाः कुलमतभेदाः न सन्तीति समौन्नत्याय बद्धकङ्कणः बभूव। अयं नदीस्नानगमने ब्राह्मणभुजं, प्रत्यागमन समये पञ्चमकुलीनभुजं आल्बनं चकार। रामानुजाचार्यः उदात्तहृदयः पीडितजनपक्षपाती पञ्चमकुलस्थानामपि आध्यात्मिक चिन्तनभावं कल्पयामासेति स्वामिविवेकानन्देनैव प्रस्तुतः। ढिल्लीतः आनीतचेल्वापिल्लरायोत्सवमूर्तौ स्वमिनि अमिताभिमानं प्रदर्शयन्त्याः महम्मदीयबीविदेव्याः नारायणमूर्तिपादापद्मसमीपे प्रातिनिध्यं कल्पयित्वा पूजानिर्वहणाय व्यवस्थाञ्चकार। कान्ताव्यर्मोहवश वस्त्रव्यापरिणं पश्चात्तप्तं कृत्वा स्वशिष्यञ्चकारायं। रामानुजजन्मदिने पुत्रप्राप्तिव्रतमाचरन्तीति चतुर्वर्गचिन्तामणिग्रन्थे प्रोक्तम् रामानुजः वैखानसागमोक्तरीत्या वैष्णवालयेषु सर्वेषु यावद्दिनं पूजा कार्यक्रमव्यस्थाञ्चाकार। रामानुजविशिष्टाद्वैत सिद्धान्तः -

प्रत्यक्षानुमानशब्दप्रमाणेषु अङ्गीकृतेष्वपि रामानुजेन, प्रत्यक्षप्रमाणस्य सत्यं दत्तम्। कर्मज्ञानभक्तियोगेषु भक्तिमार्ग एव श्रेष्ठः सुलभतया आचरणीयः सगुणसाकारनारायणतत्त्वे प्रेमप्रधानभक्तिमार्गः सर्वजनसुलभमोक्षमार्गः, विश्वं न मिथ्या, जीवात्मा परमात्मा भिन्नौ परमात्मा अचेतनं। चेतनं जीवः, चेतनाचेतने, परमात्मशरीरे एव। परमात्मा अद्वितीयोऽपि चेतनाचेतने परमात्मशरीरे एव। परमात्मा अद्वितीयोऽपि चेतनाचेतनविशिष्टः, अतएव सिद्धान्तोऽयं विशिष्टद्वैतसिद्धान्तः इति कथ्यते। जगत् ईश्वर भिन्न एव ईश्वराधीने एव, एवमेव परमात्मा जीवजगद्भ्यां पुक्तः अनेकत्वमङ्गीकरोति। अतएव इदं विशिष्टाद्वैतं डा.सर्वेपल्लिराधाकृष्णन् पण्डितैरप्यङ्गीकृतम्। देवानां दिव्यमङ्गलस्वरुपत्वं तदुपासनत्वं व्यर्थं न भवति विशिष्टाद्वैते भक्तिप्रपत्ति शरणागतीनां अत्यन्तं प्राधान्यं वर्तते। पुराणेतिहासेषु परमात्मनः सगुणसाकारत्व तत्त्वचित्रणात् गुणरूपाणि भगवतः अङ्गीकार्याण्येव। रामकृष्णाद्यवताराः विभवावताराः।

**पूजा विधानम् : -** रामानुजाचार्य जयन्ती दिने यावद्भारते वैष्णवालयेषु रामानुजविग्रहान् पवित्रजलेन संशुद्धीकृत्य पुष्पमालाभिरलङ्कृत्य नैवेद्यं समर्प्य भक्त्या तमाराध्य शास्त्रोक्तरीत्या पूजाकार्यक्रमान् निर्वहन्ति। रामानुजस्तोत्रविष्णु सहस्रनामस्तोत्रपारायणं समाचरन्ति।



कृतघ्ने नास्ति निष्कृतिः, कृषितो नास्ति दुर्भिक्षम्।

# पतिव्रताशक्तेः पुरतः महती तपश्शक्तिरपि निष्फलैव



- डा.केशमा
चरवाणी - ८४९८८८८२२५

पुरा कस्मिंश्चिद्ग्रामे कौशिकनामकः ब्राह्मणः वसति स्म। सः तपश्शीलः निरन्तराध्ययनतत्परः। कदाचित्सः ग्राम समीपस्थवृक्षमूले आसीनः वेदान् पठति स्म। हठात् वृक्ष शाखास्थ बकपक्षी तदुपरि मलं तत्याज। विप्रः सः महाक्रोधात् तं पक्षिणमपश्यत्। तत्क्रोधाग्निना सः पक्षी भस्मसाद्बभूव। तत्पक्षिमरणं दृष्ट्वा पश्चात्तप्तः सः ब्राह्मणः ''दयाहीनोऽहं निष्कारणतया पक्षिणः प्राणहानिकारकः अभवमिति कुतो मे शान्तिरिति बहुधा चिन्तयन् मध्याह्नसमयत्वात् क्षुन्निवाराणाय भिक्षार्थं ग्रामं जगाम। तत्र एकस्मिन् पुण्यगृह द्वारे स्थित्वा भवति! भिक्षान्देहि इत्युच्चैः आरावमकरोत्। तदा गृहिणी संभ्रमात् भिक्षां दातुं पात्रं शोधयति स्म। तदैव तस्याः भर्ता क्षुत्पीडितः गृहमाजगाम। पतिव्रता क्षुत्पीडितं भर्तारं दृष्ट्वा भक्त्या तस्य भोजनं समर्प्य तदनन्तरं तस्य शय्यामपि संसिद्धां कृत्वा, तत्पादमर्दनं कुर्वती ब्राह्मणेन भिक्षायाचनां संस्मृत्य भिक्षां स्वीकृत्य द्वारप्रदेशमाजगाम। सः कौशिक ब्राह्मणः रोषलोचनः कोपोद्रिक्तः ''हे दुर्मते भिक्षार्थं मदभ्यर्थनां श्रुत्वापि उपेक्षाभावेन सालस्यं भिक्षां दातुमागताऽसि। मदोन्मत्ता त्वं मां अवमानितं कृतवतीति साक्रोशमवदत्। तच्छ्रुत्वा मानिनी सा सविनयं ''मद्भर्ता तदैव गृहमागतः, भोजयित्वा तत्सपर्यां कुर्वन्ती त्वां विस्मृता। क्षन्तव्याहमिति प्रार्थयामास। सः कौशिकब्राह्मणः तच्छ्रुत्वा अतितीव्रकोपेन किं तव भर्ता मत्तः अपि अधिकः? लोकवन्द्यभूसुरान्नेव अवमानपात्राणि कृताऽसि। अवमानितभूसुरक्रोधाग्निना त्रिभुवनान्यपि भस्मीपटलं भविष्यन्ति। किं त्वं एतद्विषयं न जानासि? इत्यवोचत्। तदा तद्वाक्यं श्रुत्वा सा पतिव्रता ''हे महानुभाव! ब्रह्मविदां ब्राह्मणश्रेष्ठानां महिमानमहं जानामि। आग्रहानुग्रहसमर्थबहुब्राह्मणचरितं श्रृणोमि। परन्तु मम पतिरेव परमं दैवम्। त्रिकरणशुद्ध्या तद्धिताचरणमेव मम व्रतम्। त्वं महाकोपीत्यहं जानामि। तव क्रोधातिशयात् बकपक्षिणः प्राणाः एव गताः। मत्प्रातिव्रत्यमहिम्ना इमं विषयं ज्ञातवती अऽस्मि क्रोधमोहावेव मानवानां घोरशत्रू। इन्द्रियाणि विजित्य सत्यवाक्पालकः, गुरुजनहितकारी कामदूरः यः भवेत् स एव मोक्षार्हः। षट्कर्माचरण कर्ता एव ब्राह्मणः इति प्रसिद्धिः। ब्राह्मणस्य शमाध्ययने एव धनम्। ते एव धर्मगतिसाधनानि। त्वं केवलं स्वाध्यायपरः ब्राह्मणः, न धर्म सूक्ष्मज्ञानी। अतः मिथिलानगरं गत्वा धर्मव्याधात् सर्वधर्मसूक्ष्मान् जानीहि इत्यवोचत्। सः तद्वचनानि, श्रुत्वा ''मातः! तव पतिभक्तिः प्रशंसनीयेति मद्वितं प्रशान्तमिति तव शुभं भूयादित्युक्त्वा मिथिलायां धर्मव्याधसकाशं गत्वा तस्य जितेन्द्रियत्वं, प्रशान्तचित्तं ज्ञात्वा तस्मात् सर्वधर्मान् ज्ञात्वा प्रतिनिवृत्तः।

पतिपादपरायणमानिनीमणीन् परकोपतापादयः किमपि न करिष्यन्ति अतः कामक्रोधाद्यरिषड्वर्गं विजेतारः एव पूज्याः।

चित्रकथा

# परदुर्बोधः प्रविनाशायैव

तेलुगुमूलम् -डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०





चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः।


एतद्वचश्श्रवणात् कैकीयी विह्वला जाता
मम पुत्रस्य अटवीवासः स्याद्वा सा दुर्गतिः मम पुत्रस्य आगमिष्यति वा?
हां अद्य तव वचनानि जानामि सा वनवासगतिः रामस्यैव प्रवर्तितव्या।
अद्य का गतिः?
गतिर्वर्तते। वर्तते एव। पूर्वं तव महाराजेन प्रदत्तवरद्वयं एतावत्पर्यन्तं न दत्तम्। त्वया च न पृष्टम्। अद्य पृच्छ।
कोपगृहं गत्वा कार्यं साधय। भरतस्य पट्टाभिषेकं, रामस्य वनवासवाग्दानं पृच्छ।
महाराजः वरान् पूरयिष्यति वा?
आदौ वरवाग्दानप्रमाणं पञ्चभूतसाक्षित्वेन पूरयितुं पृच्छ। तदा राजा दशरथः वाग्दान प्रमाणभङ्गं न करिष्यति।
भवतु! त्वदुक्तरीत्या करिष्यामि मन्थरे! यदि अस्मादालोचनकार्यं साफल्यं स्यात् तव स्वर्णकवचं दास्यामि।
महत् सन्तोषेण कैकेयी - श्व मम पुत्रः भरतः अयोध्यानगरचक्रवर्ती अहं राजमाता भविष्यामि।
21
मन्थरावचनं श्रुत्वा कैकेयी महापापकूपे पतिता। अन्ते माङ्गल्य विहीना जाता। सर्वदृष्टौ दोषिणी सञ्जाता। समैक्य कुटुम्बेषु अग्निदाहकमन्थर समाः लोके बह्वः सन्ति जागृताः भवन्तु। परदुर्बोध दूरत्वेन सर्वे भद्राणि पश्यन्तु।
सर्वे भद्राणि पश्यन्तु।



# बालविनोदिनी

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?






प्रह्लादः कं मार्गमनुगच्छन् नरसिंहस्वामिनं प्रप्स्यति।

मार्गं अण्विषन्तु





कूर्मचित्रस्य दर्शनेन, देवदानवैः सागरमन्थन चित्रदर्शनेन च बालकाः किं स्मरिष्यन्ति।





गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।


Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.

21-03-2025 तिथौ तिरुमल श्रीवेङ्कटेश्वरस्वामिनं आन्ध्रप्रदेशमुख्यमन्त्रिणः माननीय श्री यन्.चन्द्रबाबुनायुडु महोदयाः वेदपण्डितानां आशीर्वादं प्राप्तवन्त। धर्मकर्तृमण्डल्यध्यक्षः श्री बि.आर्.नायुडु महोदयः, ति.ति.देवस्थानकार्यनिर्वहणाधिकारिणः, जे.श्यामला रावु, ऐ.ए.यस्., महोदयः ति.ति.देवस्थानानुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच्. वेङ्कय्यचौदरि महोदयाः ए.आर. यस्., तीर्थप्रसादं, चित्रपटं, पञ्चाङ्गं, डैरी, क्यालण्डर् आगरुवत्तिकाः, पञ्चगव्योत्पत्तीश्च समर्पितवन्तः। अस्मिन्कार्यक्रमे ति.ति.देवस्थान धर्मकर्तृमण्डलीसदस्या गणः, अन्यान्नोतोद्योगिनश्च भागं गृहीतवन्तः। अस्मिन् सन्दर्भे मुख्यमन्त्रिणः ति.ति.देवस्थानान्नप्रसाद केन्द्रे भक्तेभ्यः अन्नप्रसादवितरणं चक्रुः।











युगादिपर्वदिने 30.03.2025 तिथौ ति.ति.देवस्थान प्रधान सम्पादककार्यालये प्रत्येकश्रेण्युपसम्पादकेभ्यः डा.कम्पेल्लरविचन्द्रन् महोदयेभ्यः आन्ध्रप्रदेशराष्ट्रप्रभुत्व सर्वोन्नतपुरस्कारः हंस कलारत्न बिरुदं जीवितपर्यन्तं आन्ध्रप्रदेशराष्ट्र गौरव मुख्यमन्त्रिणः श्रीनाराचन्द्रबाबुनायुडु महोदयाः तुम्मलपल्लि कलाक्षेत्रे विजयवाड नगरे प्रदत्तवन्तः। एवं ति.ति.देवस्थान प्रधान सम्पादकाः, डा.के.राधारमणमहोदयाः, सम्पादक डा. वि.जि.चोक्कलिङ्गं महोदयाः अभिनन्दितवन्तः।



ति.ति.देवस्थानेन अर्न्तर्जातीयमहिलादिनोत्सवः वैभवोपतेतया 07-03-2025 प्रवर्तितः। अस्मिन् सन्दर्भे विविधविभागेषु विशेषसेवां कृतवद्भ्यः द्वादशमहिलोद्योगिनीभ्यः ''पद्मावती महिला'' सन्मानपत्रं ति.ति.देवस्थानधिकारिभिः प्रदत्तम्। अस्मिन कार्यक्रमे ति.ति. देवस्थानानुबन्धकार्यनिर्वहणाधिकारणिः, श्री सि.हेच्.वेङ्कय्यचौदरि ए.आर्.यस्., ति.ति.देवस्थान धर्मकर्तृमण्डलीसभ्याः श्रीमति ए.रङ्गश्री, श्रीमति जानकीदेवी अन्यमहिलोद्योगिन्यश्च भागंगृहीतवत्यः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-04-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.

